क्रं. २५ (ब) संस्कृत.

वामनसूक्त.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1) श्रीगणेशायनमः ॐ अस्यवा॰मस्यपलितस्यहोतु
स्तस्यभ्रातामध्यमोऽअस्त्यश्नः॥ तृतीयोभ्राताघृतपृ
ष्ठोऽअस्यात्रापश्यंविश्पतिंसप्तपुत्रं॥ सप्तयुंजंतिर
थमेकचक्रमेकोऽअश्वोवहतिसप्तनामा॥ त्रिनाभिच
क्रमजरमनर्वंयत्रेमाविश्वाभुवनाधितस्थुः॥ इमं
रथमधियेसप्ततस्थुःसप्तचक्रंसप्तवहंत्यश्वाः॥ स
प्तस्वसारोऽअभिसंनवंतेयत्रगवांनिहितासप्तना
म॥ कोददर्शप्रथमंजायमानमस्थन्वंतंयदनस्था म४
बिभर्ति॥ भूम्याअसुरसृगात्माक्वस्वित्कोवि
द्वांसमुपगात्प्रष्टुमेतत्॥ पाकःपृच्छामिमनसा
विजानंदेवानामेनानिहितापदानि॥ वत्सेबष्क

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

येधिसप्ततंतून्वितत्निरेकवयऽओतवाउ॥१॥अचि
कित्वांचिकितुषश्चिदत्रकवीन्पृछामिविद्मनेनविद्वा
न्॥वियस्तस्तंभषाळिमारजांस्यजस्यरूपेकिमपि
स्विदेकं॥इहब्रवीतुयईमंगवेदास्यवामस्यनिहितं
पदंवेः॥शीर्ष्णः क्षीरंदुह्रतेगावोऽअस्यवव्रिंवसा
नाउदकंपदापुः॥मातापितरमृतआबभाजधीत्य
ग्रेमनसासंहिजग्मे॥साबीभत्सुर्गर्भरसानिविं
द्धानमस्वंतइडुपवाकमीयुः॥युक्तामातासीद्धुरि १
दक्षिणायाऽअतिष्ठद्गर्भेवृजनीष्वंतः॥अमीमे
द्वत्सोऽअनुगामपश्यद्विश्वरूप्यंत्रिषुयोजने

वामन॰
॥२॥
(2A)

नाभिः॥ सनेमिचक्रमजरंविवावृतउत्तानायांदश
युक्तावहंति॥ सूर्यस्यचक्षूरजसैत्यावृतंतस्मिन्ना
र्पिताभुवनानिविश्वा॥ साकंजानांसप्तथमाहुरेकजं
षळिद्यमाऋषयोदेवजाइति॥ तेषामिष्टानि
विहितानिधामशःस्थात्रेरेजंतेविकृतानिरूप
शः॥३॥ स्त्रियःसतीस्तांउमेपुंसआहुःपश्य
दक्षण्वान्नविचेतदंधः॥ कविर्यःपुत्रःसईमाचि
केतयस्ताविजानात्सपितुष्पितासत्॥ अवः
परेणपरएनावरेणपदावत्संबिभ्रतीगौरुद ॥२॥
स्थात्॥ साकद्रीचीकंस्विदर्धंपरागात्क्वस्वित्सू

(3)

षु॥ तिस्रो मातृृस्त्रीन्पितृृन्बिभ्रदेक ऊर्ध्वस्तस्थौ
नेमवग्लापयंति॥ मंत्रयंते दिवो अमुष्य पृष्ठे वि
श्वविदं वाचमविश्वमिन्वां॥ २॥ द्वादशारं नहि त
ज्जराय वर्वर्ति चक्रं परिद्यामृतस्य॥ आ पुत्रा अग्ने
मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः॥
पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्द्धे
पुरीषिणं॥ अथेमे अन्य उपरे विचक्षणं सप्
तचक्रे षळर आहुरर्पितं॥ पंचारे चक्रे परिवर्त
माने तस्मिन्ना तस्थुर्भुवनानि विश्वा॥ तस्य
नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते स

वा मन्	(3A)

येतुरगातुजीवमेजद्ध्रुवंमध्यऽआपस्त्यानाम्॥
जीवोमृतस्यचरतिस्वधाभिरमर्त्योमर्त्येनास
योनिः॥६॥अपश्यंगोपामनिपद्यमानमाच
परावपथिभिश्चरंतं॥ससध्रीचीःसविषूचीर्वसा
नआवरीवर्तिभुवनेष्वंतः॥यईंचकारनसोऽअ
वेद स्ययईंददर्शहिरुगिन्नुतस्मात्॥समातुर्योना
परिवीतोअंतर्बहुप्रजानिर्ऋतिमाविवेश॥
द्यौर्मेपिताजनितानाभिरत्रबंधुर्मेमातापृथि
वीमहीयम्॥उत्तानयोश्चम्वो३र्योनिरंतरत्रा। ४
पितादुहितुर्गर्भमाधात्॥पृच्छामित्वापरमंत

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

दुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनाम्॥श्रे
ष्ठंसवंसवितासाविषन्नोभीद्धोघर्मस्तदुषु
प्रवोचं॥हिंकृण्वतीवसुपत्नीवसूनांवत्समि
च्छंतीमनसाभ्यागात॥दुहामश्विभ्यांपयोअ
घ्न्येयंसावर्द्धतांमहतेसौभगाय॥गौरमीमेदनु
वत्संमिषंतंमूर्द्धानंहिंकृणोन्मातवाउ॥सृ
क्वाणंघर्ममभिवावशानामिमातिमायुंपयतेप
योभिः॥अयंसशिंक्तेयेनगौरभीवृतामिमाति
मायुंध्वसनावधिश्रिता॥साचित्तिभिर्निहिचका
रमर्त्यंविद्युद्भवंतीप्रतिवव्रिमौहत॥अनच्छ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(4A)

सहस्राक्षरापरमेव्योमन्॥ तस्याःसमुद्रा
अधिविक्षरंतितेनजीवंतिप्रदिशश्चतस्रः॥
ततःक्षरत्यक्षरंतद्विश्वमुपजीवति॥शकम
यंधूममारादपश्यंविषूवतापरएनावरेण॥
उक्षाणंपृश्निमपचंतवीरास्तानिधर्माणिप्र
थमान्यासन्॥त्रयःकेशिनऋतुथाविचक्ष
तेसंवत्सरेवपतएकएषां॥विश्वमेकोऽभि
चष्टेशचीभिर्ध्राजिरेकस्यददृशेनरूपं॥चत्वा
रिवाक्परिमितापदानितानिविदुर्ब्राह्मणा
येमनीषिणः॥गुहात्रीणिनिहितानेंगयं

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5) तुरीयंवाचोमनुष्यावदंति॥ इंद्रंमित्रंवरुणमग्नि
माहुरथोदिव्यःससुपर्णोगरुत्मान्॥ एकंस
॥९॥ द्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमा
हुः॥९॥ कृष्णंनियानंहरयःसुपर्णाअपोव ॥९॥
सानादिवमुत्पतंति॥तआववृत्रन्त्सदनादृत
स्यादिद्घृतेनपृथिवीव्युद्यते॥ द्वादशप्रधय
श्चक्रमेकंत्रीणिनभ्यानिकउतच्चिकेत॥तस्मिं
त्साकंत्रिशतानशंकवोर्पिताःषष्टिर्नचलाच
लासः॥ यस्तेस्तनःशशयोयोमयोभूर्येन
विश्वापुष्यसिवार्याणि॥ योरत्नधावसुवि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

घः खुदत्रः स रस्वांतेतामेहंधातवेक्रः॥ यज्ञेनय
ज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्॥
तेहनाकंमहिमानः सर्वतयत्रपूर्वेसाध्याः संतिदे
वाः॥ समानमेतदुदकमुच्चेत्यवचाहभिः॥ भूमिंप
र्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयः॥ दिव्यंसुपर्णं
वायंसंबृहंतमपांगर्भंदर्शतमोषधीनां॥ अभी
षतोवृष्टिभिस्तर्पयंतंसरस्वंतमवसेजोहवीमि॥
१०॥ ॥ इतिवामनसूक्तसमाप्तं॥ श्रीकृष्ण
भट्टेशेपनामकगोसास्ब्राभटेनालिखितं॥

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com